संस्कृत वार्ता:

दिनाङ्क : 17/08/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- विकसितभारतस्य दिशि सार्वजनिकक्षेत्रस्य बैङ्केषु तत्सम्बद्धपरिष्काराणाम् अथ भाविस्वरूपस्य च समीक्षायै प्रशासनम् उच्चस्तरीयसमितेः निर्माणं करिष्यति।
- केन्द्रीयगृहमन्त्री अमितशाहः अद्य उक्तवान् यत् मोदिप्रशासनेन स्वातन्त्र्यदिवसात् पूर्वम् आई.एस्.आई. इत्यनेन समर्थितं शाहजादभट्टी-आतङ्किजालं ध्वस्तीकृतम्।
- शिक्षामन्त्री प्रह्लादजोशी निर्धारितपरीक्षा-कार्यविधेः कठोरतया अनुपालनं सुनिश्चेतुम् अधिकारिभिः सह उपवेशनं कृत्वा निर्देशान् प्रदत्तवान्।
- भारतेन स्वीये अध्यक्षतावसरे ब्रिक्स्-सहयोगे जनकेन्द्रिता मानवताप्रधाना च दृष्टिः पुनः प्रकटिता।
- बीडब्ल्यूएफ्-बैड्मिण्टन्-विश्वस्पर्धा नवदिल्ल्यां प्रारब्धा; भारतस्य एम्. आर्. अर्जुन-हरिहरन्-अम्साकरुणन् इत्येतयोः पुरुषयुगलं द्वितीयचरणे प्रविष्टम्।

-----------------------------------------------------------

सीतारामन-बैंकिंग

विकसित-भारतस्य लक्ष्य-प्राप्तये सर्वकारेण शीघ्रमेव वित्तकोष-क्षेत्रे काचित् उच्चाधिकार-समितिः निर्मास्यते। केन्द्रीय-वित्तमन्त्री निर्मला सीतारामन इत्येषा अद्य नवदिल्ल्यां द्विदिवसीयस्य सार्वजनिक-क्षेत्रीय-बैंक-सम्मेलनस्य उद्घाटनं कृत्वा एतत् घोषितवती। सा प्रतिपादितवती यत् एषा समितिः विविध-विषयान् विचार्य वित्तकोषीय-परिष्काराणां भावि-दिशं निर्धारयिष्यति। वित्तमन्त्रिणा आशा प्रकटीकृता यत् अस्मिन् सम्मेलने सञ्जातानां परिचर्चानां निष्कर्षाः वित्तकोषाणां भावि-भूमिकायाः विषये संस्तुति-निर्माणे च समित्यै महत्वपूर्णान् दृढ-परामर्शान् प्रदास्यन्ति। सा न्यगादीत् यत् भारतीय-वित्तकोषाः सम्प्रति सुदृढ-स्थितौ सन्ति, यत्र अनुत्पादक-परिसम्पत्तयः स्वकीय-न्यूनतम-स्तरे वर्तन्ते, या स्थितिः अग्रे परिष्काराणां कृते दृढाधारं प्रदास्यति।

-----------------------------------------------------------

## शाह-आतङ्कजालम्

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य स्पष्टीकृतवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः कुशल-नेतृत्वे सर्वकारेण स्वतन्त्रता-दिवसात् पूर्वम् आईएसआई-पोषितस्य शहज़ाद-भट्टी-आतङ्क-समूहस्य समूलनाशो विहितः । सः असूचयत् यत् सुरक्षा-बलैः द्विशताधिकाः सदस्याः निगृहीताः अथ तेषां राष्ट्र-विरोधि-विध्वंसकाक्रमणानां योजनाश्चापि विफलीकृताः। एकस्मिन् सामाजिक-सञ्जालीय-सन्देशे गृहमन्त्रिणा प्रतिपादितं यत् सुरक्षा-बलैः चतुर्दशसु राज्येषु विविधेषु स्थानेषु समन्वित-अभियानानि सञ्चाल्य अयं आतङ्कवादः ध्वस्तीकृतः । एतत् तावत् आतङ्कवादमभिव्याप्य भारतस्य असहिष्णुतायाः उत्कृष्टम् उदाहरणं वर्तते। सः प्रतिपादितवान् यत् तेषां पक्षतः हस्त-विस्फोटकानि, आईडी-विस्फोटक-यन्त्राणि, भुशुण्डिकाः, अथ च अन्वीक्षण-यन्त्राणि च स्वायत्तीकृतानि । श्रीशाहः संयोजितवान् यत् एतत् आतङ्क-जालम् अनेकेषु राष्ट्र-विरोधि-आतङ्की-कृत्येषु संलिप्तम् आसीत्।

---

## जोशी-उपवेशनम्

शिक्षामन्त्री प्रल्हाद-जोशी अद्य नवदिल्ल्यां उच्चशिक्षा-विभागस्य सचिवेन, राष्ट्रिय-परीक्षा-संस्थायाः महानिदेशकेन अथ अन्यैः वरिष्ठाधिकारिभिः सह उपवेशनम् अकरोत्। उपवेशने मन्त्रिणा निर्दिष्टं यत् निर्धारितानां परीक्षा-मानदण्डानां दृढतया अनुपालनं भवेत्। सः गोपनीय-कार्य-संरचना, पृथक्कृत-प्रकोष्ठाः अन्तर्जाल-सम्पर्क-रहितानि उपकरणानि, अपि च विद्युदुपकरण-निक्षेप-मादण्डः इत्यादीनां सम्यक्-क्रियान्वयनाय आदिशत्। संस्था सर्वविधानां परीक्षा-प्रक्रियाणां गभीर-लेखापरीक्षां कर्तुं एवं च परिष्कार-पदक्षेपाणां प्रतिवेदनं समर्पयितुं निर्दिष्टा । उपवेशनावसरे अधिकारिभिः मन्त्रिणः समक्षं सद्यो जातानां घटनानां पृष्ठभूमौ सम्पूर्ण-व्यवस्थायाः परिष्कार-सन्दर्भे राष्ट्रिय-परीक्षा-संस्थया गृहीतानां परिष्कारात्मक-पदक्षेपाणां विवरणं प्रकटीकृतम्।

---

## राष्ट्रपति-उत्तराखण्डः

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य उत्तराखण्डे कुमाऊँ-क्षेत्रस्य सीमान्त-ग्रामेभ्यः आगतेन छात्रसमूहेन सह मेलनम् अकरोत्। एषः छात्र-समूहः राष्ट्रिय-एकता-यात्रायाः अङ्गतया राष्ट्रपति-भवने समागतः।

---------------------------------------------------------

## उपराष्ट्रपतिः-तमिलनाडु

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् इत्यसौ अद्य प्रतिपादितवान् यत् कृत्रिम-बुद्धिमत्तायाः अथ च तीव्र-गत्या विकसमानायाः प्रौद्योगिक्याः युगे उपाधि-प्राप्तिः शिक्षायाः अन्तः नास्ति, अपि तु निरन्तर-अनुकूल-जीवनस्य नूतनारम्भः वर्तते। सः अद्य तमिलनाडु-राज्यस्य तिरुवारूर्-नगरे तमिलनाडु-केन्द्रीय-विश्वविद्यालयस्य एकादशमे दीक्षान्त-समारोहे सम्बोधनं कुर्वन् आसीत्। उपराष्ट्रपतिना चतुर्दशाधिक-द्विसहस्रतमात् वर्षात् आरभ्य भारतस्य शैक्षणिक-आधारभूत-संरचनायाः अभूतपूर्वः विस्तारः रेखाङ्कितः। सः समग्रे देशे षोडश आई-आई-टी-संस्थानानां अष्ट-केन्द्रीय-विश्वविद्यालयानां, अष्ट-आई-आई-एम-संस्थानानां, अथ च द्वादश-नूतन-एम्स चिकित्सालयानां स्थापनायाः विषये उल्लिखितवान्। सः समाजे निर्धनतां अज्ञानतां च दूरीकर्तुं शिक्षां परमसाधनत्वेन वर्णितवान् ।

---------------------------------------------------------

## प्रधानमन्त्री-बीरभूमदुर्घटना

प्रधानमन्त्री नरेन्द्रमोदी पश्चिमबङ्गालस्य बीरभूम-स्थले सञ्जाते भीषणाग्निकाण्डे जातां प्राणहानिमालक्ष्य अनुशोचितवान्। एकस्मिन् सामाजिक-सञ्चार-पटलीय-सन्देशे सः शोकसन्तप्त-कुटुम्बेभ्यः सान्त्वनां प्रायच्छत्। प्रधानमन्त्रिणा आहतानां शीघ्र-स्वास्थ्य-लाभाय अपि प्रार्थना कृता। सः आश्वासितवान् यत् स्थानिक-प्रशासनं दुर्घटना-ग्रस्तेभ्यः साहाय्यं प्रदातुं सर्वविधप्रकारेण प्रयतते। प्रधानमन्त्रिणा प्रधानमन्त्रि-राष्ट्रिय-सहायता-कोषात् मृतकानां

परिजनेभ्यः लक्षद्वय-रूप्यकाणां, अथ च व्रणितेभ्यः पञ्चाशत्-सहस्र-रूप्यकाणां अनुग्रह-धनराशेः प्रघोषणम् कृतम्।

---------------------------------------------------------

दलेला - ब्रिक्स् नागरिकमञ्चः

भारतं प्रधानमन्त्रिणः नरेन्द्रमोदिनः परिकल्पनया निर्देशितां जनकेन्द्रितां मानवताप्रधानां च दृष्टिं प्रति स्वप्रतिबद्धतां पुनः प्राकटयत्। विदेशमन्त्रालयस्य आर्थिकसम्बन्धसचिवः सुधाकर-दलेला इत्येषः अद्य उक्तवान् यत् भारतेन स्वीये ब्रिक्स् इत्यस्य अध्यक्षतावधौ सामूहिकप्रयत्नानां केन्द्रे जनाः स्थापिताः। नवदिल्ल्याम् आयोजितम् अस्य वर्षस्य ब्रिक्स् नागरिकमञ्चं सम्बोधयन् असौ एतत् उक्तवान्। असौ अवदत् यत् अध्यक्षतावसरे विभिन्नेषु नगरेषु पञ्चाशदधिक-त्रिशताधिकानि उपवेशनानि सम्पन्नानि, यैः विभिन्नेषु क्षेत्रेषु महत्त्वपूर्णाः परिणामाः प्राप्ताः। असौ अग्रे उक्तवान् यत् एतैः उपवेशनैः ब्रिक्स् इत्यस्य त्रयाणाम् आधारस्तम्भानाम् - राजनैतिक-सुरक्षासहयोगः वित्तीयसहयोगः प्रतिजनमध्ये पारस्परिक-सहभागिता चेत्येतेषां मध्ये परस्परं सहयोगः इतोपि सुदृढः अभवत्। अस्य वर्षस्य ब्रिक्स् नागरिकमञ्चम् इत्यस्य विषये श्री दलेला उक्तवान् यत् अस्माद् आयोजनात् प्राप्ताः परामर्शाः अस्मिन् वर्षे आयोज्यमानाय ब्रिक्स्-नेतृणां शिखरसम्मेलनाय उपयोगिनः भविष्यन्ति।

---------------------------------------------------------

बीडब्ल्यूएफ् - बैड्मिण्टन् - परिणामः

बीडब्ल्यूएफ्-बैड्मिण्टन्-विश्वस्पर्धायां भारतीययुगलं एम्. आर्. अर्जुनः तथा हरिहरन् अम्साकरुणन् च नवदिल्ल्यां पुरुषयुगलवर्गस्य द्वितीयचरणे प्रविष्टवन्तौ।

।। इति वार्ता: ।।